अनयार्चापुरश्चरणसिद्धेन ब्राह्मणेन लिङ्गपूजां कारयेत् । लिङ्गस्य दक्षिणे कुण्डं पूर्ववत् कल्पयित्वा स्वाग्निमाधायाज्यदूर्वातण्डुलशमीस-मिद्भिः प्रत्येकमष्टशतं जुहुयाद्देवसन्निधावष्टसहस्रं जपेत् । आलयम-भितः प्रदक्षिणमष्टसहस्रं तावत् प्रणामं च कुर्यात् । एतैः प्रसन्नो भवति भगवान् प्रसन्नो भवति । नमस्त इत्यस्या ऋचः काण्ड ऋषिः कवषो वा । अनुष्टुप् छन्दः । रुद्रो देवता । हे रुद्र तव सहजाय मन्यवे नमः । अस्त्विति वक्ष्यमाणमन्त्रार्थादनुषज्यते । रोद-यति सर्वमन्तकाल इति रुद्रः । दा-दाने तत्र भवतीति वा । रुत्या श्रुत्या वेदात्मना धर्मादीन् बोधयति प्रापयतीति वा । रुत्या प्रणवरूपया स्वात्मानं प्रापयतीति वा रोरूयमाणो द्रवति प्रविशति मर्त्यानिति वा रुजं संसारदुःखं द्रावयतीति वा अशुभद्रावको वा । दरादाजहार पुन-र्भवमिति वा रुतिं शब्दं राति ददातीति वा । प्राणो रुद्र इति वा । रुतिं

शब्दं वेदात्मानं ब्रह्मणे कल्पादौ ददातीति रुद्रः । मन्यवे मन्युः क्रोधः क्रोधात्मिका तव शक्तिः शान्तरूपा भवतु ॥ . . .

ध्यानम् ।

आकर्णकृष्टे धनुषि ज्वलन्तीं दैवीमिषुं भास्वति सन्दधानम् ।
ध्यायेन्महेशं महनीयवेषं देव्या युतं योगतनुं युवानम् ॥

End:

एकरात्रमुपवासं कृत्वा एकरात्रजपतस्सिद्धो भवति । यं यं कामं प्रार्थयते त्र्यहं जप्त्वा तं तं लभत एकं च यजुस्त्रयं समन्त्रं व्यस्तञ्च जपेद्यथाकामफलदं पुरश्चर्यानन्तरं यथाकृच्छ्रद्वयं जपित्वा एकादशसहस्रं जपः एतत्सर्वं पश्चिमद्वारे शिवालये कर्तव्यम् ।

ध्यानम् । वृषाधिरूढं देवेशं सर्वलोकैककारणम् ।
ध्यायेद्ब्रह्मादिभिः स्तुत्यं पार्वतीसहितं शिवम् ॥

जपमात्रेण सर्वसिद्धिर्भवति । त्रिषवणस्नायी जपित्वा पञ्चपातकात् पूतो भवति ।

Colophon:

इति विद्यारण्यविरचिते यजुर्वेदभाष्ये श्रीरुद्र एकादशोऽनुवाकः ॥

यावज्जीवं प्रणवमथवावर्तयेद्रुद्रियं वा
याजुर्वेदं वसतिमथवा वारणस्यां विदध्यात् ।
त्यक्त्वा लज्जां कलिमलकुलच्छेदकानीरयेद्वा
विष्णोर्नामान्यनिशमथवा मुक्तिरेषा चतुर्धा ॥
चतुर्णामपि वेदानां शतरुद्रीयमुत्तमम् ।
एकादशानुवाकानामष्टमं चेष्टदायकम् ॥
चत्वारिंशन्मनूनान्तु षण्मन्त्रास्सिद्धिदायकाः ।
तन्मध्ये जीवरत्नं स्यात् शिव इत्यक्षरद्वयम् ॥

नानध्याये जपेद्विद्वान् रौद्रान्मन्त्रेतरांस्तथा ।
पौरुषं पावमानं च गृहीतनियमादृते ॥

सूतसंहितायां शिवेन विष्णुं प्रत्युक्तम् ।

यः पुमान् शतरुद्रीयं जपति श्रद्धया सह ।
दिने दिने महाविष्णो मरणादूर्ध्वमैश्वरम् ॥
ज्ञानं लब्ध्वा स विज्ञानात्स याति परमां गतिम्
यश्श्रद्धया युतो नित्यं शतरुद्रीयमभ्यसेत् ॥
अग्निदाहात्सुरापानादकृता(त्या)चरणात्तथा ।
मुच्यते ब्रह्महत्याया इति कैवल्यशाखिनः ॥
शतशाखागतिं साक्षाच्छतरुद्रीयमुच्यते ।
तस्मात्तज्जपमात्रेण सर्वपापैः प्रमुच्यते ॥
चमकं च जपेद्विद्वान् सर्वपापप्रशान्तये ।
सहस्रशीर्षसूक्तं च शिवसङ्कल्पमेव च ॥
जपेत् पञ्चाक्षरीं चैव सतारं तारणक्षमम् ।
त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते ॥
गृहस्थैश्च वनस्थैश्च तथा वै ब्रह्मचारिभिः ।
शतरुद्रीयसंज्ञस्तु मन्त्रो जप्यो महत्तरः ॥
रुद्रजापी विमुच्येत महापातकपञ्जरात् ।
सम्यग्ज्ञानं च लभते तेन मुच्येत बन्धनात् ॥
अनेन सदृशं नित्यं नास्ति जप्यं श्रुतौ स्मृतम् ।
एषा पञ्चाक्षरी विद्या शतरुद्रीयमध्यगा ॥
पञ्चाक्षरे महादेवः सर्वदा सुप्रतिष्ठितः ।
महादेवस्य सान्निध्याद्व्यष्टिभूताश्च देवताः ॥

तत्र प्रतिष्ठिता एव वृक्षे शाखा यथा स्थिताः ।
वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा ॥
शिवे रुद्रजपात् प्रीते प्रीता याश्चान्यदेवताः ।
अन्ते रुद्रजपादेव भुक्तिमुक्तिः प्रसिद्ध्यति ॥

No. 141. रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHĀṢYAM.

Substance, palm-leaf. Size, 10 × ⅞ inches. Pages, 58. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, not new.

Begins on fol. 1*a*. For other works herein see No. 129.

This commentary is attributed to Vidyātīrtha, pupil of Paramātmatīrtha, and is complete.

The introduction of Sāyana to the Rudrapraśna in his commentary of the Taittirīyasaṁhitā is up to the end of the passage य उद्विज्यात् तस्य सञ्चर इति written on the first leaf. Then after a gap, it begins on the second leaf with the passage बिभर्तीदं चराचरम् ।

The introductory portion here seems to have been borrowed from Sāyana's commentary under a mistaken sense of identity between Vidyātīrtha and Vidyāraṇya.

Beginning:

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
इष्टकाचितयस्सर्वाः चतुर्थे हि समाहि(पि)ताः ।
रुद्राध्याये पञ्चमे तु चित्यग्नौ होम उच्यते ॥

कर्मप्रकरणे पाठात् कर्माङ्गत्वमपीष्यते ।
ज्ञानहेतुत्वमप्यस्य तथोपनिषदीरितम् ॥

* * * *

तानेव विपरीतान् प्रत्यवरोहान् हुत्वा सश्वरे पशूनामर्कपर्णमुदस्यति यं द्विष्यात्तस्य सश्वर (इ)ति ।

. . . बिभर्तीदं चराचरम् ।

आत्मत्रयमधिष्ठान(य) सृष्ट्यादि . (दीनि) करो . (ति) सः ॥

तत्र यो ऽसौ संहारकालान्तं देवो ऽधितिष्ठति । कार्यकाले त्वन्या तनूः सा च देवस्य घोरा तनूः । तस्यैते तनुवौ घोरान्या शिवान्येति । शक्तिश्च विचित्रा सर्वदा संहारकारिणी । तस्य देवस्य संहर्त्र्यै घोरा बह्वयश्च तनवः ताभ्यो भयनिवृत्त्यर्थं प्रथमेनानुवाकेन तादृशं देवं तस्योपकारिणीं च तनुं नम इत्यादिभिः नमस्कृत्य प्रसादयति । द्वितीयप्रभृतिभिरष्टाभिरनुवाकैर्देवस्य वैश्वरूपे स्तुतिं नमस्कारं च करोति । एतद्धे(तेन)देवस्तु(वं सु)तरां प्रसार(द)यति । दशमैकादश्या(शा)भ्यामभयं याचते । अयं महावाक्यार्थः । नमस्ते रुद्र मन्यव इत्यस्य कश्यप ऋषिः । अनुष्टुप् छन्दः । रुद्रो देवता ।

आकर्णकृष्टे धनुषि ज्वलन्तीं दैवीमिषुं भास्वतीं(ति)सन्दधानम् ।
ध्यायेन्महेशं महनीयवेषं देव्या युतं योगतनुं दधानम् ॥

कृच्छ्रद्वादशरात्रं चरित्वा एकादशसहस्रं एकादशदिनेषु निरन्तरं जपन् कृतपुरश्चरणो भवति । ततो ऽनेन प्रदक्षिणं नमस्कारं च कुर्यात् । ततो दक्षिणामूर्तिसन्निधावेकादशसहस्रजपादशेषपापक्षयो भवति । ततो लक्षजपात् सप्तजन्मकृतं पापं नश्यति । दक्षिणामूर्त्यग्रे अग्निं निधाय घृतपायसं श्रपयित्वा स्वाग्नौ जुहुयात् साक्षाद्देवं पश्यति ।

* * * *

य इषुधिस्तव आरे अरिसमूहे दूरे वा अस्मदाभिमुख्यं निवर्त्य तं निधेहि स्थापय ॥

इति रुद्रसिद्धान्तविवरणे प्रथमोऽनुवाकः ॥

End:

अत्र पृथि(व्यां) वर्तमानानां रुद्राणां अन्नमिषुः एवमितरत्रापि योजनीयम्। दशप्राचीः प्राङ्मुखाः अञ्जलिरूपाः दशाञ्जलयः एवमुत्तरत्र मृडयन्तु वः युष्माकं जम्भे दन्तेषु दधामि स्थापयामि भक्षयेत्यभिप्रायः ॥ समाप्तोऽयं रुद्रप्रश्नः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यपरमात्मतीर्थशिष्यविद्यातीर्थविरचितं रुद्रप्रश्नभाष्यं समाप्तम् ॥

No. **142.** कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, paper. Size, 12½ × 7½ inches. Pages, 499. Lines, 20 on a page. Character, Telugu. In good condition. Appearance, new.

Complete. Begins on fol. 1*a*. The other work herein is Kṛṣṇayajurvēdakāṭhakam, fol. 263*a*.

The Brāhmaṇa of the Black Yajur Vēda is called Parāyata and contains three Aṣṭakas known as Prathamāṣṭaka, Dvitīyāṣṭaka and Tṛtīyāṣṭaka. All these have been published by Rājēndra Lala Mitra in the *Bibliotheca Indica* with the commentary of Sāyaṇa.

Beginning:

हरिः ओम् ॥ ब्रह्म सन्धत्तं तन्मे जिन्वतम्। क्षत्र ँ सन्धत्तं तन्मे जिन्वतम्। इष ँ सन्धत्तं तां मे जिन्वतम्। ऊर्ज ँ सन्धत्तं ताम्मे जिन्वतम्।

End:

यदग्निहोत्रं जुहोति । अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति । एतदनुकृति ह स्म वै पुरा । अश्वस्य मे (ध्य) स्य विवर्तने विवर्तने जुहुति ॥ 84 ॥

पदेऽग्निहोत्रं जुहोति त्रीणि च । प्रजापतिस्तमष्टादशभिः । प्रजापतिरकामय.ोभावस्मै युञ्जन्ति . . . प्रजापतिरश्वमेधं जुहुति ॥ हरिः ओम् ॥

No. 143. कृष्णयजुर्वेदब्राह्मणम्.

KRṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 204. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old

Aṣṭakas 1 and 2, complete.

Begins on fol. 1*a*. The other works herein are Kṛṣṇayajurvēdāruṇam, fol. 103*a*, Sarvaprāyaścittānukramaṇikā, fol. 172*a*.

The copyist, by name Veṅkaṭēśvara, son of Gūḍha Timmabhaṭṭa, finished the transcription of the first Aṣṭaka on Sunday the 7th of Āśvija Śuddha of Paridhāvi year.

No. 144. कृष्णयजुर्वेदब्राह्मणम्.

KRṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 163. Lines, 8 on a page. Character, Grantha. Appearance, new. Incorrect. In good condition.

Contains the first of the three Aṣṭakas of the Taittirīya Brāhmaṇa.

For beginning see No. 142.

End:

अथो तम एवापहते अग्निष्टोममन्‍तत आहरति । अग्निः सर्वा देवताः । देवतास्वेव प्रति तिष्ठति ॥ 24 ॥ उत्तरं प्रतिष्ठित्यै पशव्यः सप्त च ॥ 10 ॥

वरुणस्य जामिपा ईश्वरो वा आग्नेयमिन्द्रस्य यत्रिपुग्निष्टोममुपत्वेयं वैरजता प्रतिष्ठितो दश ॥ वरुणस्येन्द्रियमनिरुक्तो यदाह पवस्व चत्वारिंशत् ॥ 40 ॥ वरुणस्य प्रतितिष्ठति । हरिः ओम् ॥

आङ्गिरसाब्दे मिथुने चतुर्थ्यां भानुवासरे ।
मध्ये कलियुगे चैव लिखितं पुस्तकन्त्विदम् ॥
वाञ्छेश्वरस्य पुत्रेण चैकश्चाप्यष्टकन्तथा ॥

The following entry in ink is made at the beginning :—

"Vol. I.—This volume contains the first Aṣṭakam of the Śākhā of Yajurvēdam: complete in eight Praśnas." The following is written at the end: "Here ends the first Aṣṭakam of Yajur-vēdam.

Calicut, 1824. C. W. WHISH.

Here ends the first volume of the Śākha of the Yajurvēdam.

C. W. WHISH."

No. 145. कृष्णयजुर्वेदब्राह्मणम्

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 130. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the first Aṣṭaka, complete.

The copyist is called Veṅkaṭasubba, and the copying was finished on the 5th Bhādrapada of Pramōda (?) year.

Begins on fol. 1*a*. The other work herein is Śrīsūktabhāṣyam, fol. 66*a*.

No. 146. कृष्णयजुर्वेदब्राह्मणम्

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 226. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first Aṣṭaka, complete.

The transcription was completed on Sunday the 15th of Phālguna Bahula of Dhātu year, by Paṭṭābhi son of Nañjambhaṭṭa.

No. 147. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 44. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the first Adhyāya and 43 Khaṇḍas in the 2nd Adhyāya of the first Aṣṭaka.

Begins on folio 16*a*. The other works herein are Āpastambapūrvaprayōgasāraḥ, fol 1*a*, Taittirīyōpaniṣat 38*a*, Pañcagavyavidhiḥ 41*a*.

No. 148. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 14¾ × 1½ inches. Pages, 136 Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the eighth Praśna of the first Aṣṭaka, and 1 to 6 Praśnas of the second Aṣṭaka, and the first four Khaṇḍas in the 7th Praśna.

No. 149. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 210. Lines, 7 on a page. Character, Grantha. In good condition. Appearance, new.

Contains the second Aṣṭaka of the Brāhmaṇa; complete.

Beginning:

अङ्गिरसो वै सत्रमासत तेषां पृश्निर्घर्मधुगासीत्। सर्जषेणाजीवत्। ते ऽब्रुवन्। कस्मै नु सत्रमास्महे ॥

End:

अश्वावतीर्गोमतीर्न उषा सः । वीरवतीस्सदमुच्छन्तु भद्राः । घृतं दुहाना विश्वतः प्रपीनाः । यूयं पात स्वस्तिभिः सदा नः ॥ विचक्षणाविचतुरम्मशर्म . . . पीवोऽन्नां यूयं पात स्वस्तिभिस्सदा नः ॥

आङ्गिरसे सिंहमासे चतुर्दश्यां शुभेऽहनि ।
भृगुवारे मखर्क्षे च लिखितं पुस्तकन्त्विदम् ॥
गौरिपौत्रेश्च पौत्रेण द्वितीयश्चाष्टकन्तथा ॥

There is an entry in ink as follows:—

"Vol II.—This volume contains the second Aṣṭakam of the Śākhā of the Yajur-vēdam; complete in eight Praśnas. Here ends the second Aṣṭakam of the Śākhā of the Yajur-vēdam.

Calicut, 1824. C. W. WHISH.

Here ends the second volume of the Śākhā of the Yajur-vēdam.
C. W. WHISH."

No. **150**. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 148 Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Contains the second Aṣṭaka, complete.

No. **151**. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 14½ × 1⅜ inches. Pages, 158. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the second Aṣṭaka, complete.

No. 152. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 47. Lines, 9 on a page. Character, Grantha. Appearance, new. Condition, injured.

Begins on fol. 25*a*; for other work herein see No. 78.

This begins from the concluding portion of the 5th Pañcāśat of the 7th Praśna of the II Aṣṭaka and goes on to the end of the 8th Praśna.

Beginning:

पुष्टिमेवावरुन्धे। प्रसवाय सावित्रः। अथ यत्वाष्ट्रः। त्वष्टा हि रूपाणि विकरोति। निर्वरुणत्वाय वारुणः ॥ 5 ॥

End: See No. 149.

No. 153. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 190. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 1 to 6 Praśnas and the first 38 Pañcāśats in the 7th Praśna in the II Aṣṭaka, and breaks off in the 39th Pañcāśat.

No. 154. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{4}$ inches. Pages, 58. Lines, 7 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

Contains the first 3 Praśnas in the II Aṣṭaka.

No. 155. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 70. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, not new.

Contains the 1st Praśna and 38 Pañcāśats in the 2nd Praśna of the II Aṣṭaka, and also the 9th Praśna of the III Aṣṭaka.

Begins on fol. 1*a*. The other work herein is Naiṣadhavyākhyā, fol. 36*a*.

No. 156. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm leaf. Size, 15¼ × 1½ inches. Pages, 245. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance old.

Contains the whole of the III Aṣṭaka.

Beginning:

अग्निर्नः पातु कृत्तिकाः । नक्षत्रन्देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासञ्जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभिसंवसानः ।

End:

एतदनुकृति ह स्म वै पुरा अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति ॥ पदे अग्निहोत्रञ्जुहोति त्रीणि च ॥ 32 . . . प्रजापतिरश्वमेधञ्जुह्वति ॥

The transcription was completed on Thursday the 20th of Tulā month in the year Bhava.

The following entry in ink is found :—

"This volume contains the third Ashṭakam of the Śākhā of the Yajur vedam in nine Praśnas. Here ends the third Aṣṭakam of the Yajur-vēdam in nine Praśnas. Here ends the Śākhā of the Yajur-vēdam : complete in three volumes.

Calicut, 1824. C. W. WHISH."

No. 157. कृष्णयजुर्वेदब्राह्मणम् .

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, paper. Size, $11\frac{1}{2} \times 5\frac{1}{2}$ inches. Pages, 220. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Kṛṣṇayajurvēdakāṭhakam (fol. 110*b*).

Contains the whole of the III Aṣṭaka.

No. 158. कृष्णयजुर्वेदब्राह्मणम् .

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, $13 \times 1\frac{1}{4}$ inches. Pages, 216. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains 1 to 8 Praśnas and 82 Pañcāśats in the 9th Praśna of the III Aṣṭaka ; *i.e.*, two Pañcāśats are wanting to complete it.

The end is यो ऽश्वमेधेन यजते । य उ चैनमेवं वेद । मेधो भवद्यजत एति वेद ॥

No. 159. कृष्णयजुर्वेदब्राह्मणम् .

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 31. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 34*a*. The other work herein is Mahānyāsaḥ (fol. 1*a*.).

Contains the first Praśna of the III Aṣṭaka.

No. 160. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 193. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the whole of the III Aṣṭaka.

No. 161. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Sub·tance, palm-leaf. Size, 13½ × 11⅛ inches. Page·, 110. Lines, 6 on a page. Character, Grantha. Appearance, old. Good, but torn at the ends.

Contains 2 to 6 Praśnas of the III Aṣṭaka.

Beginning:

(तृतीयस्यामितो) दिवि सोम आसीत्। तं गायत्र्याहरत्। तस्य पर्णमच्छिद्यत। तत्पर्णो ऽभवत्। तत्पर्णस्य पर्णत्वं। ब्रह्म वै पर्णः ॥

End:

इषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः। सूक्तवाकाय सूक्ता ब्रूहि ॥

न पाद व्रणीताष्टौ च . . . सु द्राविणा एहि यज ॥

No. 162. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 202. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first Praśna of the II Aṣṭaka and the whole of the III Aṣṭaka.

No. 163. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 50. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance new.

Begins on fol. 30*a*. The other work contained herein is Kṛsṇayajarvēdakāṭhakam fol. 1*a*.

This contains the 7th Praśna of the III Aṣṭaka, called अच्छिद्रम्.

Beginning:

सर्वान् वा एषोऽग्नौ कामान् प्रवेशयति । (यो)ऽग्निन्वाधाय व्रतमुपैति । स यदनिष्ट्वा प्रयायात ॥

End:

स च तान्नः शचीपतिः ॥ वनस्पतावद्भ्यो ऽोका दधिरे . . सर्वान् शचीपतिः ॥

No. 164. कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆAM.

Substance, palm-leaf. Size, 15⅛ × 1¼ inches. Pages, 138. Lines, 5 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

Contains the first 6 Praśnas of the III Aṣṭaka.

No. 165. कृष्णयजुर्वेदब्राह्मणभाष्यम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆABHĀṢYAM.

Substance, palm-leaf. Size, 17¾ × 1¾ inches. Pages, 204. Lines, 6 on a page. Character, Telugu. Condition, injured. Apperance, new.

This contains the commentary of Sāyaṇācārya on the 2nd Pañcāśat of the 6th Praśna of the II Aṣṭaka and ends with a portion of the 6th Pañcāśat of the 6th Anuvāka of the 8th Praśna of the same Aṣṭaka.

Beginning:

यस्य तं पुरा सोमं जीर्णमसौ सोमातिपवितः । यद्वा यस्य सोमो वोधोद्वारेण निर्गतः सो ऽयं सोमातिपवितः । तस्य मपयः शोधनार्थं मन्त्रमाह । वायुः पूतः पवित्रेण . . सखेति । पुनातु ते परिसुत-मिति पूर्ववदि . . . मोपज्यते प्रत्यङ्कृतिद्रुतः अधो निर्गतः । अन्य-त्पूर्ववद्व्याख्येयम । कल्पः । ब्रह्मक्षत्रं पवत इति सुरां प्रति प्रस्थातेति.

* * * * * *

सुरा गृह्णाति चैषाद्यैर्मन्त्रैः संसादयेत् त्रिभिः ।
ओजो ऽसीत्यादिभिः सप्तमन्त्रैस्तानुपतिष्ठते ॥
प्रथमे ह्यनुवाकेऽस्मिन् एकोनत्रिंशदीरिताः ।
इति सायणाचार्यविरचिते प्रथमो ऽनुवाकः ॥

Colophon:—इति [माधवीये] सायणाचार्यविरचिते माधवीये वेदार्थ-प्रकाशे यजुर्ब्राह्मणे द्वितीयकाण्डे अष्टमप्रपाठके पञ्चमो ऽनुवाकः ॥

End:

गर्मातनुस्थिपिराहाभिर्दुदुह्रे विश्वाः पिन्वथस्व नरस्य धेवाः ॥ अनुवामेकः पवीरा ववर्तिते ॥

No. 166. कृष्णयजुर्वेदब्राह्मणभाष्यम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆABHĀṢYAM.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 200. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

This contains the commentary of Mādhavācārya for the III Aṣṭaka as far as the 9th Anuvāka of the 7th Praśna.

Beginning:

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं ज त् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अग्निहोत्रादिकं कर्म द्वितीये काण्ड ईरितम् ।
नक्षत्रेष्ट्यादिकं कर्म द्वि(तृ)तीये काण्ड उच्यते ॥
आद्यप्रपाठके पूर्वभागे याज्यानुवाक्यकाः (गाः) ।
क्रमेणेष्टिषु वर्ण्यन्ते उत्तमेऽस्मिंस्तदिष्टया(यः) ॥

तत्र प्रथमानुवाके देवनक्षत्राणां याज्यानुवाक्या[:]तद्विभागश्च ब्राह्मणसमाम्नातः। कृत्तिकाः प्रथमं विशाखे उत्तमं तानि देवनक्षत्राणि। अनूराधाः प्रथमं अपभरणीरुत्तमं तानि नक्षत्राणीति । तत्र नक्षत्रेषु प्रथमस्य पुरोऽनुवाक्यामाह । अग्निर्नः पातु कृत्तिकाः ॥

End:

हुताहुतस्य सोमस्य संसर्गे जुहुयादिमम् ।
यज्ञस्येत्यधमायेति सोमभक्षणमि . . ॥

Colophon:—इति माधवीये वेदार्थप्रकाशे यजुर्वेदब्राह्मणे तृतीयकाण्डे सप्तमप्रपाठके अष्टमोऽनुवाकः ॥

* * * *

इन्द्रो नाम श्रुतो गणे इति एष षोडशीग्रहः स्वयं ब्रह्मा ॥

No. **167**. कृष्णयजुर्वेदब्राह्मणभाष्यम्.

KṚṢṆAYAJURVĒDA-BRÂHMAṆABHĀṢYAM.

Substance, paper. Size, 12⅛ × 9⅝ inches. Pages, 201. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance new.

Contains the commentary of Bhaṭṭabhāskara on the 1st Aṣṭaka.

Copied for the Library in January 1893.

Beginning :

वन्दे वेदामरतरुं नानाशाखोपशोभितम् ।
स्वर्गापवर्गफलदं विबुधैरुपसेवितम् ॥
वन्दे(?)निश्रेयसोपायधर्मब्रह्मात्मबोधिने ।
वेदाय सर्वगुरवे शिवाय च नमो नमः ॥
ईशानस्सर्वविद्यानां भूतानामीश्वरः परः ।
पुनातु सर्वदा युष्मान् शब्दब्रह्मतनुश्शिवः ॥

अथ पारक्षुद्राननुक्रमिष्यामः । अनारभ्याधीतानां प्रकृत्यर्थत्वात्तल्लिङ्गवचनाभ्यान्निर्धार्यमाणानि विकृत्यर्थानि। तत्राद्यो ऽनुवाकश्शुक्रामन्थि ग्रहप्रचारे विनियुक्तः । तत्र जघनेनोत्तरवेदिं ग्रहावरली वा सन्धत्ते(त्ते) ऽध्वर्युः प्रतिप्रस्थाता च। ब्रह्म सन्धत्तमिति यजूंषि ग्रहकाण्डत्वात् सोमार्षेयम्। ब्रह्म ब्राह्मणजातिं ब्रह्मवर्चसं वा मदीयं सन्धत्तं संहितमविच्छिन्नं कुरुत मया सह। किञ्च तद्ब्रह्म मे जिन्वतं प्रीणयतं जिवि प्रीणने इदित्वान्नुम्। एवं क्षत्रादिषु द्रष्टव्यम् . . . .

End :

एवं विदित्वा यजमानश्च व्युच्छन्तीवस्यसी व्युच्छन्तीति सामर्थ्यात्। अथो अपि खलु तनश्च सर्वं बाह्यमाभ्यन्तरञ्च अपहते व्यत्ययेनात्मनेपदम्। अग्निष्टोममिति अग्निष्टोममुदयनीयमन्ते आहरति अग्रेस्सर्वदेवतात्वात् सुप्रतिष्ठितो भवति । सन्तिष्ठन्ते राजसूयाः ॥

Colophon :—इति प्रथमाष्टके अष्टमे प्रपाठके दशमो ऽनुवाकः॥ समाप्तश्च प्रपाठकः ॥ अष्टकश्च सम्पूर्णं प्रथमम् ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये पारक्षुद्रेषु प्रथममष्टकं सम्पूर्णम् ॥

No. 168. कृष्णयजुर्वेदब्राह्मणभाष्यम्.

KṚṢṆAYAJURVĒDA-BRĀHMAṆABHĀṢYAM.

Substance, paper. Size, 12 × 9½ inches. Pages, 290. Lines, 19 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Kṛṣṇayajurvēdakāṭhakabhāṣyam (fol. 147*a*).

Contains the commentary of Bhaṭṭabhāskara on the 3rd Aṣṭaka which is not quite complete. It breaks off in the 22nd Anuvāka of the 9th Praśna.

Beginning:

प्रथमेऽनुवाके देवनक्षत्राणां याज्यानुवाक्या तद्विभागश्च ब्राह्मणे समाम्नातः। कृत्तिकाः प्रथमं विशाखे त्रीणि तत्र देवनक्षत्रेषु प्रथमस्य पुरोऽनुवाक्या। अग्निर्न इति योऽयं कृत्तिकानक्षत्रस्य देवतारूपोऽग्निः स नोऽस्मान् पातु। कीदृशं नक्षत्रं देवं द्योतमानं इन्द्रियमिन्द्रियवृद्धिदम्। आसां कृत्तिकानां तदुपलक्षितस्याग्नेश्चासन्नास्ये मुखे विचक्षणं विविधप्रकाशसाधनमिदं हविर्जुहोतन हे ऋत्विग्यजमानाः ॥

* * * *

Colophon:—इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये तृतीयेऽष्टके ऽष्टमः प्रपाठकः समाप्तः ॥

प्रजापतिरश्वमेधमित्यादि प्रजापतिसृष्टो ऽश्वमेधः तत्सकाशादपागच्छत्।

End:

तस्मादश्वमेधयाजी देवानामयनेन मार्गेण एति गच्छति यत्र न मृत्युः तस्मात्प्राजापत्येन कामप्रेणानेन यज्ञेन यजुषा अपुनर्मारं पुनर्मरणनिवृत्ति

गच्छति जरामरणरहितो भवति । एतस्येति एतस्य प्रजारूपेणोपलक्षितं प्राजापत्यमृषभं सेत्तारं तूबरं शृङ्गरहितं सर्वरूपं नानावर्णं पुरस्तादश्वमेधारम्भ एव साङ्ग्रहणीसंज्ञान्योरनन्तरमेव वैशाख्यां पौर्णमास्यामालभते ।

No. 169. कृष्णयजुर्वेदारुणम्.
KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, paper. Size, 12¼ × 7½ inches. Pages, 176. Lines, 19 on a page. Character, Telugu. Appearance, old. Condition, good. Contains the first five Praśnas.

The work has been edited with Sāyaṇa's commentary in the *Bibliotheca Indica.*

According to this MS., the Áruṇa consists of five Praśnas and the Upaniṣat of five Praśnas. The Praśna beginning with चित्तः स्रुक् is taken here as the 1st Praśna of the Upaniṣat.

Begins on fol. 1*b*. The other works herein are Tripurātāpinyupaniṣat (92*b*), Dēvyupaniṣat (102*a*), Tripurōpaniṣat (104*a*), Bhāvōpaniṣat (104*b*), Ṛgvēdasamhitā (fol. 107*a*). (This last work herein contained is exactly like the one noticed in No. 6.)

Beginning:

First Praśna—

भद्रं कर्णेभिः शृणुयाम देवाः . . . बृहस्पतिर्दधातु । ओं शान्तिः शान्तिः शान्तिः । भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः . . . बृहस्पतिर्दधातु ॥ आपमापामपः सर्वाः ।

Second Praśna—

नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि । ओं शान्तिः शान्तिः शान्तिः ॥ हरिः ओम् ॥ सह वै देवानां चासुराणां च यज्ञौ प्रततावास्ताम्

Third Praśna—

नमो नु मदन्तु । ओं शान्तिः शान्तिः शान्तिः ॥ युञ्जते मन उत युञ्जते धियः । विप्रा विप्रस्य बृहतो विपश्चितः . . . .

Fourth Praśna—

शन्नस्तन्नो माहासीत् ॥ ओं शान्तिः शान्तिः शान्तिः ॥ हरिः ओम् ॥ देवा वै सत्रमासत । ऋद्धिपरिमितं यशस्कामाः

Fifth Praśna—

सन्त्वा सिञ्चामि यजुषा प्रजामायुर्धनञ्च ॥ ओं शान्तिः शान्तिः शान्तिः ॥ हरिः ओम् ॥ परे युवांऽसम्प्रवतो महीरनु बहुभ्यः पन्थामनपस्पशानम् । . .

Sixth Praśna—

तच्छं योरावृणीमहे । . . . ओं शान्तिः शान्तिः शान्तिः चितिः स्रुक् । चित्तमाज्यम् ।

Seventh Praśna—

शन्नो मित्रः शं वरुणः ।

Eighth Praśna—

सह नाववतु । . . . ओं शान्तिः शान्तिः शान्तिः । ब्रह्मविदाप्नोति परम् ।

Ninth Praśna—

सह नाववतु । . . . भृगुर्वै वारुणिः

Tenth Praśna—

सह नाववतु । . . . अम्भस्यपारे ।

No. 170. कृष्णयजुर्वेदारण्यकम् .

KṚṢṆAYAJURVĒDĀRAṆYAKAM.

Substance, palm-leaf. Size, 15 × $1\frac{1}{4}$ inches. Pages, 328. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

The Kāṭhaka as well as the Upaniṣat is included under the heading Āraṇyaka, which is thus made to contain 11 Praśnas. The Upaniṣat is here divided into two Praśnas only.

The arrangement of the Praśnas is different from that of No. 169.

Beginning:

I. Praśna. भद्रं कर्णेभिः शृणुयाम देवाः ।
II. ,, सह वै देवानां चासुराणाञ्च ।
III. ,, चित्तिः स्रुक् । चित्तमाज्यं । वाग्वेदिः ।
IV. ,, परेयुवांसं प्रवतो महीरनु बहुभ्यः पन्थामनपस्पशानम्
V. ,, शं नो मित्रः शं वरुणः । } उपनिषत्
VI. ,, अम्भस्यपारे भुवनस्य मध्ये । }
VII. ,, नमो वाचे नमो वाचस्पतये . . ओं शान्तिः शान्तिः शान्तिः ॥ युञ्जते मन उत युञ्जते धियः ।
VIII. ,, देवा वै सत्रमासत । ऋद्धिपरिमिंत यशस्कामाः ।
IX. ,, संज्ञानं विज्ञानं प्रज्ञानं जानदभि जानत् ।
X. ,, लोको ऽसि स्वर्गो ऽसि । अनन्तो ऽस्यपारो ऽसि
XI. ,, तुभ्यन्ता अङ्गिरस्तमाश्यामतं काममग्ने ।

End:

येभ्यश्चैनत्प्राहुः ॥ 57 ॥ . . . . .

In the beginning the following entry is found :—

"This volume (containing 164 leaves) comprehends the Áraṇyam of the Yajur-vēdam."

The following entry is found at the end :—

"Here ends the Āraṇyam of the Yajurvēdam, complete in thirteen Praṣnas.

N.B.—The Upanishad (Śanno mitrah) &c., though cited as one, contains three Praṣnas.

C. W. Whish.

Calicut, 1824.

The Āraṇyaṁ complete in one volume."

No. 171. कृष्णयजुर्वेदारुणम् .

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 142. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete. Contains the Praśnas beginning with—

(1) भद्रं कर्णेभिः
(2) सह वै देवानाम्.
(3) चित्तिः स्रुक्.
(4) युञ्जते मन उत.
(5) देवा वै सत्रन्.
(6) परेयुवांसम्
(7) शन्नो मित्रः
(8) ब्रह्मविदाप्नोति परम्
(9) भृगुर्वै वारुणिः
(10) अम्भस्यपारे

The date given in the first leaf, *viz.*, Thursday the 4th of Jyēṣṭha Śuddha of Vijaya, seems to be the date of transcription.

No. 172. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYĀJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, 17¼ × 1⅝ inches. Pages, 137. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 103*a*. *Vide* No. 143.

Complete.

The arrangement of the Praśnas is similar to that in No. 171.

No. 173. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 88. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Contains the third and the fourth Praśnas as noticed in No. 168, *i.e.*, the Praśnas beginning with नमो वाचे and देवा वै सत्रमासत.

No. 174. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, 11½ × 1¼ inches. Pages, 60. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the first Praśna, complete.

No. 175. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 12. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

This contains the Praśna beginning with चित्तिः स्रुक्.

No. 176. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf (Śrītāla). Size, 19½ × 2 inches. Pages, 16. Lines, 12 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Taittirīyōpaniṣat (fol. 9*a*).

Contains the I Praśna. An entry at the end states that the copying was completed on the 10th of the Kṛttika month of the Krōdhana year by Gurunātha.

No. 177. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 46. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, new.

Contains only the I Praśna. The date of transcription is given at the end as follows:—

आनन्दाब्दे चैत्रकृष्णदशम्यां स्थिरवासरे ।

No. 178. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 201. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains the Āruṇa from the 6th Anuvāka of the I Praśna and also the Praśnas beginning with—

(2) सह वै.
(3) चित्तिः स्रुक्.
(4) शन्नो मित्रः.
(5) अम्भस्यपारे.
(6) युञ्जते मनः.
(7) देवा वै.
(8) परे युवांसं.

No. 179. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 96. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Praśnas beginning with—

(1) भद्रं, (2) सह वै, (3) युञ्जते मनः.

Begins on fol. 1*a*. The other works herein are Jyōtisstambhavratam, 49*a*, Vivēkacūḍāmaṇiḥ, 55*a*, Vēdāntaparibhāṣā, 82*a*.

No. 180. कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Substance, country paper. Size, 9 × 5¼ inches. Pages, 26. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old. Correct. Bound in the wrong way.

Begins on fol. 53*b*. The other works herein are Ṣaṭchāntiḥ 2*b*, Tārakabrahmōpaniṣat 4*b*, Kēnōpaniṣat 7*b*, Īśāvāsyōpaniṣat 9*b*, Kaṭhavailyupaniṣat 25*b*, Aitarōyōpaniṣat 31*b*, Yōgacūḍāmaṇyupaniṣat 40*b*, Kaulōpaniṣat 56*b*, Mahānārāyaṇōpaniṣat 98*b*, Praśnōpaniṣat 105*a*, Muṇḍakōpaniṣat 111*a*, Māṇḍūkyōpaniṣat 114*b*, Śvētāśvatarōpaniṣat 125*b*, Brahmavidyōpaniṣat 128*b*, Ātmaprabōdhōpaniṣat 129*b*, Garbhōpaniṣat 132*b*.

Contains the first 44 Pañcāśats in the 3rd Praśna.

No. 181. कृष्णयजुर्वेदारण्यकभाष्यम्.

KṚṢṆAYAJURVĒDĀRAṆYAKABHĀṢYAM.

Substance, paper. Size, 12⅛ × 9⅝ inches. Pages, 119. Lines, 30 on a page. Character, Grantha. Condition, good. Appearance, recent.

Contains the commentary of Bhaṭṭabhāskara on Praśnas 1 to 3, viz., (1) भद्रं कर्णेभिः, (2) सह वै देवानां, (3) चित्तिः स्रुक्.

Beginning:

ईशानस्सर्वविद्यानां भूतानामीश्वरः परः ।
पुनातु सर्वदा युष्मान् शब्दब्रह्मतनुश्शिवः ॥

एवं व्याख्याता इष्टिपशुसोमाग्नीनां तद्विकृतीनाञ्च मन्त्रा ब्राह्मणभागाश्च । इदानीन्तिस्यैव तच्छेषभूतमरण्येऽनुवाक्यतन्त्रं व्याख्यास्यामः । अत्राहुः

होतॄन् प्रवर्ग्यकाण्डे यान् याश्चोपनिषदो विदुः ।
अरुणाम्नायविधी चैव काठके परिकीर्त्तितौ ॥

रुद्रा नारायणश्चैव मेधो यश्चैव पैतृकः ।
एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति ॥

कल्पे पितृविधिश्चैव प्रवर्ग्यविधिरेव च ।
अरुणाम्नायविधी चैव शतरुद्रविधिस्तथा ॥

काठकेष्टय आम्नाता मन्त्रास्तानप्यतन्द्रितः ।
यथाव्रतमुपाकृत्य त्वधीयीतेति चोद्यते ॥

अत्र सन्त्यष्टौ काठके काण्डानि कठमुनिना दृष्टानि सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणकेतुकाख्यानि पञ्चाग्निचित्यानि दिवःश्येनयोपाधाश्चेष्टयः(अपामेष्टयः) स्वाध्यायब्राह्मणमष्टममिति। तेषामारुणकेतुकोऽस्मिन् प्रश्ने विधीयते। अरुणाः काण्डर्षयः। प्रथमानुवाकः शान्त्यर्थ उपधानार्थश्च । आपमापामित्यत्र उपधानार्थः पुनराम्नायते । तत्राध्ययनकाले भद्रङ्कर्णेभिरिति द्वे जपति। ब्राह्मणञ्च भवति भद्रङ्कर्णेभिरिति द्वे जपित्वेति। उपधानकाले द्वे अप्येते उपदध्यात्। द्वे चैते अनु(त्रि)ष्टुभौ। हे देवाः उत्तरस्यामृचि श्रूयमाणाःइन्द्रादय आमन्त्र्यन्ते। भद्रं भजनीयं कल्याणं वेदाख्यं साङ्गेतिहासपुराणं कर्णेभिः कर्णैः श्रोत्रैः। आचार्यान्तेवासिनामृत्विग्यजमानानां वा बहुत्वाद्बहुवचनम्। बहुलञ्छन्दसीति भिस ऐसभावः। शृणुयाम युष्मत्प्रसादात् सर्वदा श्रोतुं समर्थाः स्याम। भद्रं कल्याणं यज्ञादिकर्म च अक्षभिश्चक्षुर्भिरिन्द्रियैः पश्येम द्रष्टुं समर्थाः स्याम। छन्दस्यपि दृश्यत इत्यनुदात्तत्वम्। अध्ययनश्रवणादिभिर्योगार्हा वयं पश्येम।

यजेरत्रन्प्रत्यय औणादिकः । केचिदाहुः यजनीया देवता यजत्राः इत्यामन्त्र्यन्त इति । तेषामामन्त्रितनिघातेन भवितव्यम् । व्यत्ययेन वा निघाताभावः । बह्वृचास्तु सर्वानुदात्तत्वमेवेच्छन्ति ।

*   *   *   *

Colophon:—इति भट्टभास्करमिश्रविरचिते ज्ञानयज्ञाख्ये आरण्यकतन्त्रे आरुणकेतुके प्रश्ने द्वात्रिंशोऽनुवाकः ॥ प्रश्नश्च समाप्तः ॥

द्वितीयप्रश्नः ॥

अथ
स्वाध्याये ब्राह्मणं काण्डं काठके पठितो विधिः ।

काठकशेषमारभ्यते । ऋषिर्ब्रह्मा स्वयंभूर्नाम । तत्र स्वाध्यायोऽध्येतव्य इत्यादौ यज्ञोपवीतविधानार्थो ऽयमनुवाकः । एतेनैव सिद्धे निवीतं मनुष्याणामित्यादिविधानं तद्वेषे श्रौतप्रायश्चित्तार्थम् । सह वा इति । सह वै यज्ञौ प्रततावारब्धावास्तां देवानामसुराणाञ्च वयं स्वर्गलोकं स्वामित्वेने(नै)ष्याम इति यदा देवानां प्रवृत्तिरासीत् तदा असुराणामपि वयं स्वर्गलोकमेष्याम इत्यासीत् ॥ एवमन्योन्याभिभवेनैव यज्ञौ युगपदास्ताम् ॥

*   *   *   *

Colophon:—इति भट्टभास्करमिश्रभाषिते ज्ञानयज्ञाख्ये आरण्यतन्त्रे स्वाध्यायब्राह्मणन्नाम द्वितीयः प्रपाठकस्संपूर्णः ॥

तृतीयप्रश्नः ॥

अथ चातुर्होत्रमग्निमधिकृत्योच्यते । तत्राग्रेण दर्भस्तम्बं दशहोतारमुदञ्चमुपदधाति । चित्तिः स्रुगित्यादिदशभिर्मन्त्रैः दशेष्टका उपदधाति । ब्रह्म वै चतुर्होतार इति काठके ब्राह्मणमाम्नातम् । अत्र मन्त्रा आम्नायन्ते । सर्वत्रेष्टकाः स्तूयन्ते ॥ चित्तिः स्रुक् तया देवयेत्युपधानक्रमः । आदौ सिसृक्षुः प्रजापतिः सृष्ट्यर्थं केनचिद्योगेनाध्यात्मिकेने-

ष्टवान्। तस्य यागस्य चित्तिस्स्रुक्। सिसृक्षोर्या बुद्धिः सृष्टिसङ्कल्पात्मिका सा चित्तिः। सास्य यागस्य स्रुग्बभूव सर्वमूलत्वात्। सा सर्वयज्ञसाधनस्रुग्भावेन निरूप्यते। यथा जुह्वा विना यागो न निर्वर्तयितुं शक्यते एवं चित्यापि विना न शक्यते जगत्स्रष्टुम्। सैव स्रुक्कार्यमकरोदित्यर्थः। चित्तमाज्यमिति सर्वचेत्राश्रयः महान् चित्तन्तदेवाज्यं प्रधानोपकरणत्वात् चित्तिस्स्रुक् स्थिरत्वाच्च।

*　　*　　*　　*

Colophon:—इति भट्टभास्करमिश्रभाषिते ज्ञानयज्ञाख्ये आरण्यकतन्त्रे तृतीयप्रपाठकस्सम्पूर्णः॥

No. 182. कृष्णयजुर्वेदारण्यकभाष्यम्.

KṚṢṆAYAJURVĒDĀRAṆYAKABHĀṢYAM.

Substance, paper. Size, $13\frac{3}{8} \times 8\frac{1}{4}$ inches. Pages, 161. Lines, 27 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the commentary of Bhaṭṭabhāskara on five Praśnas, 4 to 8, viz., (4) परेयुवांसं, (5) शं नो मित्रः, (6) अम्भस्यपारे, (7) युञ्जते मनः (8) देवा वैसत्रं. The three Praśnas—शीक्षावल्ली, आनन्दवल्ली and भृगुवल्ली—are constituted into one Praśna. The commentary on the 7th Prapāṭhaka is not attributed to Bhaṭṭabhāskara, that on the 8th being attributed to Varadarajā.

चतुर्थः प्रश्नः।

प्रवर्ग्यं ब्रुवता भगवता पुरुषेण कर्तव्यानि दर्शपूर्णमासादीनि संवत्सरपर्यन्तानि कर्माणि समन्त्रब्राह्मणानि विहितानि व्याख्यातानि चास्माभिः। इदानीं मृतस्य संस्काराख्यः पितृमेधाख्यः प्रस्तूयते। स एष यज्ञायुधी यजमानो ह वै सुवर्गं लोकमेतीति श्रुतेः एतस्यापि संस्कारः श्रौत इष्यते। प्रत्येकं पुरुषस्य पावन इति च स्मृतिः। अत्र पैतृमेधिकान् मन्त्रान्

व्याख्यास्यामः। प्राजापत्यं काण्डम्। त ग्राहि ग्राम्रमग्निभिरीहन्ति यज्ञपात्रे-ष्वेयपि विनियोगः । तत्र प्रेयाहवनीये जुह्वा जुहोति परेयुवांसमिति । परेयुवांसम्।उकारश्छान्दसः। बह्वृचाः परेयिवांसमित्येव पठन्ति।प्राणिनां शुभाशुभनिरीक्षणार्थं त। इतो गच्छन्तम्। कामान्(काः) प्रति । प्रवतो महीरनु प्रवतो(अनुः प्रते)रर्थे। प्रकृष्टार्थवृत्तेः प्रशब्दाच्छन्दसि धात्वर्थ इति वतिः।शतं चैतं(चेतम्) स्त्रीलिङ्गम्।प्रकृष्टा मनुष्यजातिः धर्मादिसत्पुरु-षार्थसंबन्धात्तत्प्रकर्षः। प्रवत इति चोपलक्षणम्। उद्वतो निवत इत्यपि द्रष्टव्यम्। उद्रा(द्व)ता देवजातिः। महीः भौतिका मनुष्यजातीः प्रति परे-युवांसं ताभ्य एव च बहुभ्यः पन्थां पन्थानं भनपस्पशानम्। अनो-रुकारस्य अकारश्छान्दसः। उकारमेव बह्वृचाः पठन्ति। स्पशाविज्ञानार्थः स्पशा इति चरा उच्यन्ते। चरा ज्ञातारः परवृत्तान्तानाम्। तस्य शानचि शपः श्लौ द्विर्वचनम्। आनुपूर्व्येण जानन्तः अयमस्य मार्गोऽयमस्य मार्ग इति ।

*   *   *   *

Colophon :—इति चतुर्थप्रपाठके द्वादशोऽनुवाकः पूर्णः ॥

पञ्चमप्रश्नः ।

अथ रहस्यविद्या प्रस्तूयते।ब्रह्मज्ञानं प्रधानमत्रोपदिश्यते। सर्वकामा-वाप्तिरपवर्गश्च फलं सोऽश्नुते सर्वान् कामान् सहेति श्रवणात् । परार्थ-त्वात् फलश्रुतिरर्थवाद इति चेन्न परार्थत्वाभावात्।नन्विदमस्ति आत्मा-वारे द्रष्टव्य इत्यादि। तत्रेयं स्तुतिः फलस्य विधायिका स्यात्। प्रकरणाभावे कथमस्यास्तादर्थ्यमिति चेन्न । सर्ववेदान्तप्रत्ययानामैकाविद्यात . .

*   *   *   *

युक्तानान्तु उपसंहृतसर्वार्थानां न द्रष्टृद्रष्टव्यदर्शनविभागोन्मेषः । तस्मा-सताच्चिदानन्दात्मनो ब्रह्मण उपनिषद्भ्य एव सिद्धिरित्यौपनिषदं काण्डमा-

रभ्यते । परस्य श्रेयसस्समीपे निषीदन्तीति उपनिषदः परप्राप्तिहेतवो विद्याः । ताश्च तिस्रो भवन्ति । सांहित्यः याज्ञिक्यो वारुण्यश्चेति । अधिलोकमित्यादिपञ्चमहासंहिताभावनास्सांहित्यः शन्नो मित्र इत्यारभ्य द्वादशानुवाकाः। एतत्काण्डसमाननामानः काण्डदेवता अपि सांहित्य उपनिषद उच्यन्ते । सहनाववत्वित्याद्यास्त्रयोऽनुवाका वारुण्य उपनिषदः वरुणनाम्ना ऋषिणा स्वपुत्रं प्रति प्रोक्ताः । देवताश्च तत्सनाम्न्यः । अम्भस्यपार इत्यारभ्य समस्तः प्रश्नो याज्ञिक्य उपनिषदः यज्ञनाम्ना भगवता नारायणेन दृष्टाः । पूर्ववत्तत्सनाम्न्यो देवताः । तत्र ब्रह्माध्येष्यमाणः प्रथमन्तत्रत्यूहशान्तिं प्रार्थयते शन्न इति । समस्तोऽयमनुवाको मन्त्रः । मित्रावरुणौ प्रसिद्धौ । शं सुखं तस्य हेतुर्मित्रः नोऽस्माकमाचार्यस्य ब्रह्मचारिणाश्च भवतु । वरुणश्च सुखहेतुर्भवतु । अविघ्नेनाध्ययनसम्पत्तिस्सुखम्। अत्र मित्रोऽहरजनयद्वरुणो रात्रिमिति ताभ्यां तत्कार्ययोरहोरात्रयोस्सुखं प्रार्थयते । . . . .

* * * *

Colophon:—इति भट्टभास्करविरचिते ज्ञानयज्ञाख्ये यजुरुपनिषद्भाष्ये प्रथमप्रपाठके पञ्चदशो ऽनुवाकः । आरुणे पञ्चमप्रपाठकश्च सम्पूर्णः ॥

षष्ठप्रश्नः ।

अथ पुरुषसंस्कारार्था आचमनादिमन्त्राः अग्निहोत्रादिश्रौतोपकरणतयास्मिन् प्रपाठके समाम्नाताः। एषां लिङ्गादिना विनियोगोऽन्वेष्यः। एषां सूक्तक्रमेण विधिरिति न्यायेन कल्प्यो विधिः। अयं समस्तप्रश्नो याज्ञिक्य-उपनिषद उच्यन्ते यज्ञात्मना भगवता नारायणेन दृष्टत्वात्। नारायणप्रतिपादकत्वात् देवताश्च तन्नाम्न्यः । तत्र प्रथमानुवाके अध्यात्मविषय मन्त्रा एव विनियुज्यन्ते । तत्र वारुणीषूपनिषत्सु ब्रह्मविदाप्नोति परमिति

परप्राप्तिहेतुत्वेन तद्विभूत्यात्मकमानन्दं ब्रह्म वेद्यं प्रतिज्ञाय तत्स्वरूपं तदुपासनासिद्धयश्चोक्ताः। इदानीं तस्यात्मनः परमविभूतिस्थानीयस्य कीदृशो विजृम्भणप्रकार इत्याकाङ्क्षायां तमेवात्मानमधिकृत्योच्यते अम्भस्यपार इत्यादि। अयं स्वगुणैः प्रकृत्यैकान्त्यैः कदाचिद्वर्ण्यते। परगुणेन कदाचित्तदभेदात्। त्रैष्टुभस्सर्वोऽनुवाकः। विशेषो वक्ष्यते। अम्भसि तोये अपारे पाररहिते अधस्तात् भुवनस्य मध्ये प्रपञ्चस्य मध्यावकाशे नाकस्य स्वर्गस्य पृष्ठे उपरि एवं सर्वेष्ववकाशेषु समनुप्रविष्टस्समन्तादनुक्रमेण प्रविश्य स्थितः कारणत्वान्मृदिव घटादिषु महतो महीयान् यन्नाम किञ्चिन्महत् ततोऽपि महीयान्महत्तरः ॥ यद्वा अम्भस्यपारे महाप्रलयावस्थायां भुवनस्य मध्ये प्रपञ्चावस्थायां नाकस्य पृष्ठे अपवर्गावस्थायां सर्वदा सन्निहितः ॥

* * * *

Colophon :—इत्यारुणे तैत्तिरीयोपनिषदि द्वितीयप्रश्ने याज्ञिकीषूपनिषत्सु चतुष्षष्टितमोऽनुवाकः। समाप्तश्च षष्ठः प्रपाठकः ॥

सप्तमप्रपाठकः ।

अथ शैक्षियं काण्डमारभ्यते । आरण्यकत्वादस्मिन् प्रदेशे मन्त्रब्राह्मणयोराम्नातं सोमार्षेयमत्रादौ शान्तिमुपयन्ति नमो वाच इति । नमो वाचे वेदात्मिकायै मन्त्रात्मने ब्राह्मणात्मने च या चास्माभिरुदिता उक्ता अधीता या चानधीता तस्यै सर्वस्यै वाचे नमः । . . . .

* * * *

Colophon :—इत्यारुणे सप्तमप्रपाठके एकचत्वारिंशोऽनुवाकः ॥ सम्पूर्णश्चायं प्रपाठकः ॥

अथ प्रवर्ग्यब्राह्मणम्। प्रवर्ग्यस्य पुराकल्पः देवा इत्यादि । देवाः पुर सत्रमासत ऋद्धिपरिमितं कालं यावत् फलर्द्धिर्भवति तावन्तं कालं यशः-कामा वीर्यकामाः। तेऽन्योन्यमब्रुवन् नोऽस्माकं मध्ये यं प्रथमं यश ऋच्छात् प्राप्नुयात् तदीयं यशः सर्वेषां नो ऽस्माकं सत्रिणां सह भवेदिति ॥ . .

* * * *

End:

इयं वाक् द्वादशाहे द्वादशधा प्रजापतिकृतः । अवकाशमन्त्रेभ्य एष आदित्यः प्रजा . . प्रथमे ऽहनि व(प्र)व्रज्यते । तेन सविता भूत्वा यजमानस्सर्वान् कामान् प्राप्नोति। एतेनोत्तरे व्याख्याताः । तस्मादितो लोकात्पराङ्गच्छन् अमून् स्वर्गादीन् तापान् गच्छति अमुतो लोकादिमान् सर्वत आदित्यात्मा तपत्येव आदित्यो भवतीत्यर्थः ॥

Colophon:—इत्यारुणे अष्टमप्रपाठके एकादशोऽनुवाकः॥ सम्पूर्णश्च प्रपाठकः इति वरदराजकृते आरण्यकभाष्ये प्रवर्ग्यब्राह्मणं समाप्तम्॥

व्यलीलिखदिमं भाष्यं याजुषं याजुषस्सुधीः ।
नावल्पाक्कनिवासाढ्यः ससूनुर्देशिकाह्वयः ॥

No. **183.** कृष्णयजुर्वेदारण्यकभाष्यम्.

KṚṢṆAYAJURVĒDĀRAṆYAKABHĀṢYAM.

Substance, palm-leaf. Size, 18 × $1\frac{3}{4}$ inches. Pages, 250. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

The commentary is by Bhaṭṭabhāskara and is called Jñānayajña. The arrangement and numbering of the Praśnas is similar to what is found in No. 168. As a number of leaves are wanting

in the beginning and as the MS. is very much injured, no extract is given; but the colophons are as follow :—

I. इति भट्टभास्करविरचिते ज्ञानयज्ञाख्ये आरण्यके तन्त्रे आरुणकेतुके प्रश्ने द्वात्रिंशो ऽनुवाकः । समाप्तश्च प्रथमप्रश्नः ॥

II. इति भट्टभास्कर . . स्वाध्यायब्राह्मणं समाप्तम् ॥

III. तृतीयः प्रश्नः समाप्तः

IV. पितृमेधप्रश्नः समाप्तः

V. सांहित्य उपनिषदः समाप्ताः । इति भट्टभास्कर . . . . उपनिषत्प्रश्ने पञ्चदशोऽनुवाकः

VI. समाप्ताः याज्ञिक्युपनिषदः

VII. इति वरदराजीये सप्तमप्रश्नः समाप्तः

VIII. The last leaf is torn; and it is worthy of note that the commentary on the 7th Praśna is attributted to a वरदराज.

No. 184 कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Substance, paper. Size, 12½ × 7½ inches. Pages, 39. Lines, 20, on a page. Character, Telugu. Condition, good. Appearance old.

Begins on fol. 263*a*. For other works herein see No. 142.

Contains all the three Praśnas.

Beginning :

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् । सङ्कल्पमानं प्रकल्पमानमुपकल्पमानमुपकॢप्तं कॢप्तम् ॥

End :

य एतदुपयन्ति । ये चैनत्प्राहुः । येभ्यश्चैनत्प्राहुः ॥ 56 ॥
शश्वधासतस्त्रिषासीता . . . ॥ 9 ॥ . . .
आसीद्गृहपतिः षट्टश्चाशात् ॥

No. **185.** कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Substance, paper. Size, 11½ × 5½ inches. Pages, 49. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Begins on fol. 110*b*. For other works herein see No. 157.

No. **186.** कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 48. Lines, 8 on a page. Character, Grantha. Condition, good (right-hand end bitten by rats). Appearance, new.

The passages written on the first two leaves are accented.

Contains the three Praśnas of the Kāṭhaka.

No. **187.** कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 58. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. For other works herein see No. 163.
Contains the three Praśnas; complete.

No. 188. कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 62. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the three Praśnas; complete.

No. 189. कृष्णयजुर्वेदकाठकभाष्यम्.

KṚṢṆAYAJURVĒDAKĀṬHAKABHĀṢYAM.

Substance, paper. Size, 12 × 9½ inches. Pages, 56. Lines, 24 on a page. Character, Grantha. Condition, good. Appearance, recent.

Begins on fol. 147*a*. For the other work herein see No. 168.

Contains the commentary of Bhaṭṭabhāskara on the three Praśnas.

The following stanza is found at the end:—

एष निष्पावके लोके कुशिकान्वयजन्मना ।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रवर्तितः ॥

Beginning.

एवमश्वमेधान्तानि तित्तिरिणा प्रोक्तानि। अथ काठकानि काण्डान्यष्टौ सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणकेतुकानि पञ्चचित्यानि दिवि(वः)श्येनयोऽपाघाश्चेष्ट (पामेष्ट)यः स्वाध्यायब्राह्मणमष्टममिति । तत्र चित्यानां हव्यवाट् काण्डऋषिः आरुणकेतुकस्य त्वरुणः इष्टिकाण्डयोर्विश्वेदेवाः स्वाध्यायविधेर्ब्रह्मा । तत्र सावित्राग्निमन्त्रास्संज्ञानमित्यादयः । तत्रायं

प्रयागः । उत्तमाङ्गुलिपर्वप्रमाणाः पञ्चाशीतिशतं हिरण्येष्टकाश्शर्करा-वाभ्यक्तांश्चतस्त्रस्त्वग्मातृण्णापरिमिता लोकम्पृणाश्च उपकल्प्योत्तर-वेदिदेशस्य मध्ये शङ्कुं निहत्य सर्वतः परिमण्डलं रथचक्रमात्रं सावित्रं परि-लिख्य लेखाया अभ्यन्तरं नव परिमण्डला लेखा लिखित्वा नवम्यां बाह्यायां लेखायां पञ्चदश पूर्वपक्षस्याहान्युपदधाति । अहरिष्टका इत्यर्थः । संज्ञानाद्यश्चैना अहराख्याः । ब्राह्मणञ्च एतावनुवाकौ पूर्व-पक्षस्याहोरात्राणां नामधेयानीति । तत्रैषां भिन्नवाक्यत्वात् साकाङ्क्षत्वा-च्चोपधानमन्त्राणामन्ते भूराग्निश्चेत्यनुवाक आम्नातं तया देवतयेत्येतत्तत्र कृतार्थमप्येषामर्थत्वात् प्रत्येकं संबध्यते तेन तेन च दिनेनाभेदमुपचर्य इष्टका एवोच्यन्ते । तत्र संज्ञानन्नामाद्यमहः पूर्वपक्षस्य सङ्गतं ज्ञायतेऽमा-वास्याकार्यमिष्टयादि । विज्ञानञ्च द्वितीयं व्यावृत्तं ज्ञायमानत्वात् नहि कदा चित् शुक्लद्वितीयायां परपक्षकार्यं क्रियते । प्रज्ञानं तृतीयं प्रकर्षेण ज्ञायन्ते शुभानि कर्माण्यस्मिन्निति । जानच्चतुर्थं जानात्येवात्मानं पूर्वपक्षत्वेन न तु शुभानि कर्माणि प्रवर्तयति पक्षच्छिद्रत्वात् रिक्तात्मत्वाच्च । आभि-जानत् । पञ्चमत् आभिमुख्येन शुभानि कर्माणि जानातीति ॥

End :

अथ विश्वसृजां मनस्यहःक्लृप्तिन्दर्शयति पञ्चेति । अतः परं ब्राह्मणत् । पञ्चाशदधिकशतद्वयसङ्ख्यास्संवत्सराः तावत्संवत्सरसम्बन्धिनो दिवसाः त्रिवृतः त्रिवृत्स्तोमका भवन्ति तावन्तः पञ्चदशाः तावन्तस्सप्तदशाः तावन्त एकविंशाः तस्माद्विश्वसृजामयनमेतत् सहस्रसंवत्सरं भवति । एते-न वा इत्यादि गतम् । कर्तॄणां प्रवक्तॄणां श्रोतॄणां स्तुतिः एनाननु होतॄन् कृत्वा विश्वं प्रजायते सम्पद्यते । ब्रह्मणस्सायुज्यं सलोकतां चैते गच्छ-न्ति तथा एतासामेव देवतानां विश्वसृजां सायुज्यं सार्ष्टितां समान-लोकतां च गच्छन्ति । एते के य एतत्सत्रमुपयन्ति ये चैनत् प्राहुः एतन्मा-हात्म्यं कीर्तयन्ति येभ्यश्च श्रोतृभ्यः श्रद्दधानेभ्यः [यन्ति] एतन्माहात्म्यं

प्राहुः ते सर्वेऽपि तुल्यभाजो भवन्ति । किं सत्यमित्येतत् इत्यसम्भावयन्तं प्रति पुनरवगच्छति ओमिति । एतत्सर्वं सत्यमित्यर्थः । मन्त्रोऽयमृगेकेषां यजुरेकेषां सर्वथा सर्वार्थसिद्धिः ॥

Colophon:—इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये चतुर्थेऽष्टके तृतीयकाठकं सम्पूर्णम् ॥

एष निष्पावके लोके कुशिकान्वयजन्मना ।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रवर्तितः ॥
वघधावे कलौ वर्षे शठमर्षणगोत्रजः ।
विलिलेख यजुर्भाष्यं देशिकार्यसुधीमणिः ॥

No. **190**. कृष्णयजुर्वेदः.

KṚṢṆAYAJURVĒDAḤ.

Substance, palm-leaf. Size, 12¾ × 1 inches. Pages, 32. Lines, 7 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

As this is very much injured, and as the leaves are not properly arranged, the portion of the Vēda herein cannot be well identified.

---

3 (*b*) The White Yajur Vēda.

No. **191**. शुक्लयजुर्वेदसंहिता.

ŚUKLAYAJURVĒDASAMHITĀ.

Substance, paper. Size, 12¾ × 8 inches. Pages, 220. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śuklayajurvēdapadapāṭhaḥ 113*a*.

Adhyājas 1 to 38 excepting the 36th Adhyāya; unaccented.

In the colophon at the end the word सप्त is a mistake for अष्ट consequent on the omission of the 36th Adhyāya.

This seems to be the Kāṇva-śākhā of this Vēda; for particulars about this Vēda see No. 38 in "A Descriptive Catalogue of Sanskrit Manuscripts in the Library of the Calcutta Sanskrit College, Vol. I."

The Mādhyandina-śākhā of this Vēda has been edited by Dr. A. Weber (Berlin 1849) and by Satyavrata Sāmāśrami (Calcutta Sk. 1896).

Beginning:

ओन् । इषे त्वोर्जे त्वा वायवः स्थ । देवो वः सविता प्रार्पयत् श्रेष्ठतमाय कर्मण ॥ 1 ॥ आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः । प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशꣳसः ॥ 2 ॥ धृ(ध्रु)वा अस्मिन्गोपतौ स्यात बह्वीः । यजमानस्य पशून् पाहि वसोः पवित्रमसि ॥ 3 ॥

End:

अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा । रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ 7 ॥

हरिः ओम् ॥ देवस्य त्वा दश । यमाय तिस्रः । गर्भो देवानाꣳ सप्त । त्रीण्यनुवाकेषु विꣳशतिः ॥

Colophon:—शुक्लयजुर्वेदाम्नाये सꣳहितापाठे सप्तत्रिंशत्प्रश्नः समाप्तः ॥

No. **192.** शुक्लयजुर्वेदसंहिता.

ŚUKLAYAJURVĒDASAMHITĀ.

Substance, palm-leaf. Size, 12 × 2 inches. Pages, 321. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 40 Adhyāyas.

At the end there is the following entry in ink :—

" This is the Kāṇva - Śākhā of the Vēdah. Here ends the Samhitā of the Vājasanēyī-Yajur-vēdah ; complete in 40 Adhyāyas.

C. W. Whish,
1826 *Calicut.*"

The next page contains an index noting the leaf, page, and line of the beginning of each chapter and ends with the following note :—

" End of the index of this volume. Total chapters 40. This Vēdah has 328 Anuvakas and 2,082 verses."

End :

अग्ने नय सुपथा राये अस्मा विश्वानि देव वयुनानि विद्वान । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिं विधेम । ईशावास्यमित्येकानुवाके अष्टादश ।

Colophon :— इति वाजसनेयान्तर्गतकाण्वीये शुक्लयजुर्वेदाम्नाये संहितापाठे चत्वारिंशोऽध्यायः ॥

No. **193.** शुक्लयजुर्वेदसंहितापदपाठः.

SUKLAYAJURVĒDASAṀHITĀPADAPĀṬHAḤ.

Substance, paper. Size, 12⅝ × 8 inches. Pages, 283. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 113*a*.

The Padapāṭha consists of 40 Adhyāyas ; the 30th Adhyāya is wanting.

Beginning :

शुक्लाम्बरधरं . .. शान्तये ॥

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं कृष्णं हरिहरप्रभुम् ॥
प्रपञ्चप्रविलापाय पूर्णब्रह्मोदयाय च ।
कायेन मनसा वाचा वन्दे गोपालसद्गुरुन् ॥

ओम् ॥ इषे । त्वा । ऊर्जे । त्वा । वायवः । स्थ । देवः । वः । सविता । प्र । अर्पयतु । श्रेष्ठतमायेति श्रेष्ठ - तमाय । कर्मणे ।

End:

वायुः । अनिलम् । अमृतम् । अथ । इदम् । भस्मान्तमिति भस्म-अन्तम् । शरीरम् । ओम् । क्रतो इति क्रतो । स्मर । कृतम् । स्मर । क्रतो इति क्रतो । स्मर । कृतम् । स्मर ॥ 17 ॥ अग्ने नय ओम् ॥ ईशावास्यमित्येकानुवाकेऽष्टादश ॥

Colophon:—इति वाजसनेयान्तर्गतकाण्वीये शुक्लयजुश्शाखाम्नाये पदपाठे चत्वारिंशोऽध्यायः ॥ ओं तत्सत् ॥

No. **194.** शुक्लयजुर्वेदसंहिताक्रमपाठः.

ŚUKLAYAJURVĒDASAṀHITĀKRAMAPĀṬHAḤ.

Substance, paper. Size, 12½ × 8 inches. Pages, 536. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Beginning:

